# Radha Sahasranama Namavali 1 a to kSha 1000 Names

# રાધાસહસ્રનામાવલિઃ ૧ અકારાદિ ક્ષકારાન્તાનિ

## Document Information

Text title : RadhasahasranamAvaliH 1 from Radha Manasa Tantra 1000 Names

File name : rAdhAsahasranAmAvaliH1.itx

Category : sahasranAmAvalI, devii, radha, stotra, devI, nAmAvalI

Location : doc_devii

Proofread by : PSA Easwaran

Description-comments : Radha Manasa Tantra, See corresponding stotra

Latest update : August 1, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 1, 2020

*sanskritdocuments.org*

Radha Sahasranama Namavali 1 a to kSha 1000 Names

# રાધાસહસ્રનામાવલિઃ ૧ અકારાદિ ક્ષકારાન્તાનિ

વન્દે વૃન્દાવનાનન્દા રાધિકા પરમેશ્વરી ।
ગોપિકાં પરમાં શ્રેષ્ઠાં હ્લાદિનીં શક્તિરૂપિણીમ્ ॥

શ્રીરાધાં પરમારાજ્યાં કૃષ્ણસેવાપરાયણામ્ ।
શ્રીકૃષ્ણાઙ્ગ સદાધ્યાત્રી નવધાભક્તિકારિણી ॥

યેષાં ગુણમયી-રાધા વૃષભાનુકુમારિકા ।
દામોદરપ્રિયા-રાધા મનોભીષ્ટપ્રદાયિની ॥

તસ્યા નામસહસ્રં ત્વં શ્રુણુ ભાગવતોત્તમા ॥

માનસતન્ત્રે અનુષ્ટુપ્છન્દસે અકારાદિ ક્ષકારાન્તાનિ
શ્રીરાધિકાસહસ્રનામાનિ ॥

ૐ અનન્તરૂપિણ્યૈ રાધાયૈ નમઃ । અપારગુણસાગરાયૈ । અધ્યક્ષરાયૈ ।
આદિરૂપાયૈ । અનાદિરાસેશ્વર્યૈ । અણિમાદિસિદ્ધિદાત્ર્યૈ । અધિદેવ્યૈ ।
અધીશ્વર્યૈ । અષ્ટસિદ્ધિપ્રદાયૈ દેવ્યૈ । અભયાયૈ । અખિલેશ્વર્યૈ ।
અનઙ્ગમઞ્જરીભગ્નાયૈ । અનઙ્ગદર્પનાશિન્યૈ । અનુકમ્પાપ્રદાયૈ
રાધાયૈ । અપરાધપ્રણાશિન્યૈ । અન્તર્વેત્ર્યૈ । અધિષ્ઠાત્ર્યૈ ।
અન્તર્યામ્યૈ । સનાતન્યૈ । અમલાયૈ નમઃ । ૨૦

ૐ અબલાયૈ નમઃ । બાલાયૈ । અતુલાયૈ । અનૂપમાયૈ ।
અશેષગુણસમ્પન્નાયૈ । અન્તઃકરણવાસિન્યૈ । અચ્યુતાયૈ । રમણ્યૈ ।
આદ્યાયૈ । અઙ્ગરાગવિધાયિન્યૈ । અરવિન્દપદદ્વન્દ્વાયૈ । અધ્યક્ષાયૈ ।
પરમેશ્વર્યૈ । અવનીધારિણ્યૈ દેવ્યૈ । અચિન્ત્યાદ્ભુતરૂપિણ્યૈ ।
અશેષગુણસારાયૈ । અશોકાયૈ । શોકનાશિન્યૈ । અભીષ્ટદાયૈ ।
અંશમુખ્યૈ નમઃ । ૪૦

ૐ અક્ષયાયૈ નમઃ । અદ્ભુતરૂપિણ્યૈ । અવલમ્બાયૈ । અધિષ્ઠાત્ર્યૈ ।
અકિઞ્ચનવરપ્રદાયૈ । અખિલાનન્દિન્યૈ । આદ્યાયૈ । અયાનાયૈ ।

કૃષ્ણમોહિન્યૈ । સર્વશાસ્ત્રાણાં અવધ્યૈ । આપદુદ્ધારિણ્યૈ । શુભાયૈ ।
આહ્લાદિન્યૈ । આદિશક્ત્યૈ । અન્નદાયૈ । અભયાયૈ । અન્નપૂર્ણાયૈ ।
અહોધન્યાયૈ । અતુલ્યાયૈ । અભયપ્રદાયૈ નમઃ । ૬૦

ૐ ઇન્દુમુખ્યૈ નમઃ । દિવ્યહાસાયૈ । ઇષ્ટભક્તિપ્રદાયિન્યૈ ।
ઇચ્છામય્યૈ । ઇચ્છારૂપાયૈ । ઇન્દિરાયૈ । ઈશ્વર્યૈ । અપરાયૈ ।
ઇષ્ટદાયિને ઈશ્વર્યૈ । માયાયૈ । ઇષ્ટમન્ત્રસ્વરૂપિણ્યૈ ।
ઓઙ્કારરૂપિણ્યૈ દેવ્યૈ । ઉર્વ્યૈ । સર્વજનેશ્વર્યૈ । ઐરાવતવત્યૈ ।
પૂજ્યાયૈ । અપારગુણસાગરાયૈ । કૃષ્ણપ્રાણાધિકાયૈ રાધાયૈ ।
કૃષ્ણપ્રેમવિનોદિન્યૈ । શ્રીકૃષ્ણાઙ્ગસદાધ્યાય્યૈ નમઃ । ૮૦

ૐ કૃષ્ણાનન્દપ્રદાયિન્યૈ નમઃ । કૃષ્ણાયૈ । અહ્લાદિનીદેવ્યૈ ।
કૃષ્ણધ્યાનપરાયણાયૈ । કૃષ્ણસમ્મોહિન્યૈ । નિત્યાયૈ ।
કૃષ્ણાનન્દપ્રવર્ધિન્યૈ । કૃષ્ણાનન્દાયૈ । સદાનન્દાયૈ ।
કૃષ્ણકેલ્યૈ । સુખાસ્વદાયૈ । કૃષ્ણપ્રિયાયૈ । કૃષ્ણકાન્તાયૈ ।
કૃષ્ણસેવાપરાયણાયૈ । કૃષ્ણપ્રેમાબ્ધિસભર્યૈ ।
કૃષ્ણપ્રેમતરઙ્ગિણ્યૈ । કૃષ્ણચિત્તહરાયૈ દેવ્યૈ । કીર્તિદાયૈ ।
કુલપદ્મિન્યૈ । કૃષ્ણમુખ્યૈ નમઃ । ૧૦૦

ૐ હાસમુખ્યૈ નમઃ । સદાકૃષ્ણકુતૂહલ્યૈ । કૃષ્ણાનુરાગિણ્યૈ ।
ધન્યાયૈ । કિશોર્યૈ । કૃષ્ણવલ્લભાયૈ । કૃષ્ણકામાયૈ ।
કૃષ્ણવન્દ્યાયૈ । કૃષ્ણાબ્ધે સર્વકામનાયૈ । કૃષ્ણપ્રેમમય્યૈ
રાધાયૈ । કલ્યાણ્યૈ । કમલાનનાયૈ । કૃષ્ણસૂન્માદિન્યૈ ।
કામ્યાયૈ । કૃષ્ણલીલાશિરોમણ્યૈ । કૃષ્ણસઞ્જીવન્યૈ રાધાયૈ ।
કૃષ્ણવક્ષસ્થલસ્થિતાયૈ । કૃષ્ણપ્રેમસદોન્મત્તાયૈ ।
કૃષ્ણસઙ્ગવિલાસિન્યૈ । શ્રીકૃષ્ણરમણ્યૈ રાધાયૈ નમઃ । ૧૨૦

ૐ કૃષ્ણપ્રેમાયૈ નમઃ । અકલઙ્કિણ્યૈ । કૃષ્ણપ્રેમવતીકર્ત્ર્યૈ ।
કૃષ્ણભક્તિપરાયણાયૈ । શ્રીકૃષ્ણમહિષ્યૈ । પૂર્ણાયૈ ।
શ્રીકૃષ્ણાઙ્ગપ્રિયઙ્કર્યૈ । કામગાત્રાયૈ । કામરૂપાયૈ ।
કલિકલ્મષનાશિન્યૈ । કૃષ્ણસંયુક્તકામેશ્યૈ ।
શ્રીકૃષ્ણપ્રિયવાદિન્યૈ । કૃષ્ણશક્ત્યૈ । કાઞ્ચનાભાયૈ ।
કૃષ્ણાયૈ । કૃષ્ણપ્રિયાયૈ । સત્યૈ । કૃષ્ણપ્રાણેશ્વર્યૈ ।
ધીરાયૈ । કમલાકુઞ્જવાસિન્યૈ નમઃ । ૧૪૦

ॐ કૃષ્ણપ્રાણાધિદેવ્યૈ નમઃ । કિશોરાનન્દદાયિન્યૈ ।
કૃષ્ણપ્રસાધ્યમાનાયૈ । કૃષ્ણપ્રેમપરાયણાયૈ ।
કૃષ્ણવક્ષસ્થિતાયૈ દેવ્યૈ । શ્રીકૃષ્ણાઙ્ગસદાવ્રતાયૈ ।
કુઞ્જાધિરાજમહિષ્યૈ । કૂજન્નૂપુરરઞ્જન્યૈ । કારુણ્યામૃતપાથોધ્યૈ ।
કલ્યાણ્યૈ । કરુણામય્યૈ । કુન્દકુસુમદન્તાયૈ । કસ્તૂરિબિન્દુભિઃ
શુભાયૈ । કુચકુડ્મલસૌન્દર્યાયૈ । કૃપામય્યૈ । કૃપાકર્યૈ ।
કુઞ્જવિહારિણ્યૈ । ગોપ્યૈ । કુન્દદામસુશોભિન્યૈ । કોમલાઙ્ગ્યૈ નમઃ । ૧૬૦

ॐ કમલાઙ્ઘ્ર્યૈ નમઃ । કમલાયૈ । કમલાનનાયૈ । કન્દર્પદમનાયૈ
દેવ્યૈ । કૌમાર્યૈ । નવયૌવનાયૈ । કુઙ્કુમચર્ચિતાઙ્ગ્યૈ ।
કેસરીમધ્યમોત્તમાયૈ । કાઞ્ચનાઙ્ગ્યૈ । કુરઙ્ગાક્ષ્યૈ ।
કનકાઙ્ગુલિધારિણ્યૈ । કરુણાર્ણવસમ્પૂર્ણાયૈ । કૃષ્ણપ્રેમતરઙ્ગિણ્યૈ ।
કલ્પદ્રુમાયૈ । કૃપાધ્યક્ષાયૈ । કૃષ્ણસેવાપરાયણાયૈ ।
ખઞ્જનાક્ષ્યૈ । ખનીપ્રેમણાયૈ । અખણ્ડિતાયૈ । માનકારિણ્યૈ નમઃ । ૧૮૦

ॐ ગોલોકધામિન્યૈ રાધાયૈ નમઃ । ગોકુલાનન્દદાયિન્યૈ ।
ગોવિન્દવલ્લભાયૈ દેવ્યૈ । ગોપિન્યૈ । ગુણસાગરાયૈ । ગોપાલવલ્લભાયૈ ।
ગોપ્યૈ । ગૌરાઙ્ગ્યૈ । ગોધનેશ્વર્યૈ । ગોપાલ્યૈ । ગોપિકાશ્રેષ્ઠાયૈ ।
ગોપકન્યાયૈ । ગણેશ્વર્યૈ । ગજેન્દ્રગામિન્યૈ । ગણ્યાયૈ ।
ગન્ધર્વકુલપાવન્યૈ । ગુણાધ્યક્ષાયૈ । ગણાધ્યક્ષાયૈ । ગવાં ગત્યૈ ।
ગુણાકરાયૈ નમઃ । ૨૦૦

ॐ ગુણગમ્યાયૈ નમઃ । ગૃહલક્ષ્મ્યૈ । ગોપ્યૈ ચૂડાગ્રમાલિકાયૈ ।
ગઙ્ગાગીતાગતિર્દાત્ર્યૈ । ગાયત્ર્યૈ । બ્રહ્મરૂપિણ્યૈ । ગન્ધપુષ્પધરાયૈ
દેવ્યૈ । ગન્ધમાલ્યાદિધારિણ્યૈ । ગોવિન્દપ્રેયસ્યૈ । ધીરાયૈ ।
ગોવિન્દબન્ધકારણાયૈ । જ્ઞાનદાયૈ । ગુણદાયૈ । ગમ્યાયૈ । ગોપિન્યૈ ।
ગુણશોભિન્યૈ । ગોદાવર્યૈ । ગુણાતીતાયૈ । ગોવર્ધનધનપ્રિયાયૈ ।
ગોપિન્યૈ નમઃ । ૨૨૦

ॐ ગોકુલેન્દ્રાણ્યૈ નમઃ । ગોપિકાયૈ । ગુણશાલિન્યૈ । ગન્ધેશ્વર્યૈ ।
ગુણાલમ્બાયૈ । ગુણાઙ્ગ્યૈ । ગુણપાવન્યૈ । ગોપાલસ્ય પ્રિયાયૈ
રાધાયૈ । કુઞ્જપુઞ્જવિહારિણ્યૈ । ગોકુલેન્દુમુખ્યૈ । વૃન્દાયૈ ।
ગોપાલપ્રાણવલ્લભાયૈ । ગોપાઙ્ગનાપ્રિયાયૈ રાધાયૈ । ગૌરાઙ્ગ્યૈ ।
ગૌરવાન્વિતાયૈ । ગોવત્સધારિણ્યૈ । વત્સાયૈ । સુબલાવેશધારિણ્યૈ ।

ગીર્વાણવન્દ્યાયૈ । ગીર્વાણ્યૈ નમઃ । ૨૪૦

ૐ ગોપિન્યૈ નમઃ । ગણશોભિતાયૈ । ઘનશ્યામપ્રિયાયૈ । ધીરાયૈ ।
ઘોરસંસારતારિણ્યૈ । ઘૂર્ણાયમાનનયનાયૈ । ઘોરકલ્મષનાશિન્યૈ ।
ચૈતન્યરૂપિણ્યૈ દેવ્યૈ । ચિત્તચૈતન્યદાયિન્યૈ ।
ચન્દ્રાનના (આનની નોત્ ફ઼ોઉન્દ્ ઇન્ દિચ્તિઓનર્ય્। । ચન્દ્રકાન્ત્યૈ ।
ચન્દ્રકોટિસમપ્રભાયૈ । ચન્દ્રાવલ્યૈ । શુક્લપક્ષાયૈ । ચન્દ્રાયૈ ।
કૃષ્ણવલ્લભાયૈ । ચન્દ્રાર્કનખરજ્યોત્યૈ । ચારુવેણ્યૈ ।
શિખારુચ્યૈ । ચન્દનૈશ્ચર્ચિતાઙ્ગ્યૈ નમઃ । ૨૬૦

ૐ ચતુરાયૈ નમઃ । ચઞ્ચલેક્ષણાયૈ । ચારુગોરોચનાયૈ ।
ગૌર્યૈ । ચતુર્વર્ગપ્રદાયિન્યૈ । શ્રીમત્યૈ । ચતુરાધ્યક્ષાયૈ ।
ચરમાગતિદાયિન્યૈ । ચરાચરેશ્વર્યૈ દેવ્યૈ । ચિન્તાતીતાયૈ ।
જગન્મય્યૈ । ચતુઃષષ્ટિકલાલમ્બાયૈ । ચમ્પાપુષ્પવિધારિણ્યૈ ।
ચિન્મય્યૈ । ચિચ્છક્તિરૂપાયૈ । ચર્ચિતાઙ્ગ્યૈ । મનોરમાયૈ ।
ચિત્રલેખાયૈ । શ્રીરાત્ર્યૈ । ચન્દ્રકાન્તિજિતપ્રભાયૈ નમઃ । ૨૮૦

ૐ ચતુરાપાઙ્ગમાધુર્યાયૈ નમઃ । ચારુચઞ્ચલલોચનાયૈ ।
છન્દોમય્યૈ । છન્દરૂપાયૈ । છિદ્રછન્દોવિનાશિન્યૈ । જગત્કર્ત્ર્યૈ ।
જગદ્ધાત્ર્યૈ । જગદાધારરૂપિણ્યૈ । જયદુર્ગ્યૈ । જગન્માત્રે ।
જગદાનન્દકારિણ્યૈ ઓર્ જગદાદ્યન્તકારિણ્યૈ । જયપ્રદાયૈ । જયાયૈ ।
લક્ષ્મ્યૈ । જયન્ત્યૈ । સુયશપ્રદાયૈ । જામ્બૂનદાયૈ । હેમકાન્ત્યૈ ।
જયાવત્યૈ । યશસ્વિન્યૈ નમઃ । ૩૦૦

ૐ જગદ્ધિતાયૈ નમઃ । જગત્પૂજ્યાયૈ । જનન્યૈ । લોકપાલિન્યૈ ।
જગદ્ધાત્ર્યૈ । જગત્કર્ત્ર્યૈ । જગદ્બીજસ્વરૂપિણ્યૈ । જગન્માત્રે ।
યોગમાયાયૈ । જીવાનાં ગતિદાયિન્યૈ । જીવાકૃતયે । યોગગમ્યાયૈ ।
યશોદાનન્દદાયિન્યૈ । જપાકુસુમસઙ્કાશાયૈ । પાદાબ્જામણિમણ્ડિતાયૈ ।
જાનુદ્યુતિજિતોત્ફુલ્લાયૈ । યન્ત્રણાવિઘ્નઘાતિન્યૈ । જિતેન્દ્રિયાયૈ ।
યજ્ઞરૂપાયૈ । યજ્ઞાઙ્ગ્યૈ નમઃ । ૩૨૦

ૐ જલશાયિન્યૈ નમઃ । જાનકીજન્મશૂન્યાયૈ । જન્મમૃત્યુજરાહરાયૈ ।
જાહ્નવ્યૈ । યમુનારૂપાયૈ । જામ્બૂનદસ્વરૂપિણ્યૈ ।
ઝણત્કૃતપદામ્ભોજાયૈ । જડતારિનિવારિણ્યૈ । ટઙ્કારિણ્યૈ ।
મહાધ્યાનાયૈ । દિવ્યવાદ્યવિનોદિન્યૈ । તપ્તકાઞ્ચનવર્ણાભાયૈ ।

ત્રૈલોક્યલોકતારિણ્યૈ । તિલપુષ્પજિતાયૈ નાસાયૈ । તુલસીમઞ્જરીપ્રિયાયૈ ।
ત્રૈલોક્યાકર્ષિણ્યૈ રાધાયૈ । ત્રિવર્ગફલદાયિન્યૈ ।
તુલસીતોષકર્ત્ર્યૈ । કૃષ્ણચન્દ્રતપસ્વિન્યૈ ।
તરુણાદિત્યસઙ્કાશાયૈ નમઃ । ૩૪૦

ૐ નખશ્રેણીસમપ્રભાયૈ નમઃ । ત્રૈલોક્યમઙ્ગલાયૈ દેવ્યૈ ।
દિગ્ધમૂલપદદ્વય્યૈ । ત્રૈલોક્યજનન્યૈ રાધાયૈ । તાપત્રયનિવારિણ્યૈ ।
ત્રૈલોક્યસુન્દર્યૈ । ધન્યાયૈ । તન્ત્રમન્ત્રસ્વરૂપિણ્યૈ । ત્રિકાલજ્ઞાયૈ ।
ત્રાણકર્ત્ર્યૈ । સદા ત્રૈલોક્યમઙ્ગલાયૈ । તેજસ્વિન્યૈ । તપોમૂર્ત્યૈ ।
તાપત્રયવિનાશિન્યૈ । ત્રિગુણાધારિણ્યૈ દેવ્યૈ । તારિણ્યૈ ।
ત્રિદશેશ્વર્યૈ । ત્રયોદશવયોનિત્યાયૈ । તરુણ્યૈ । નવયૌવનાયૈ નમઃ । ૩૬૦

ૐ હૃત્પદ્મે સ્થિતિમત્યૈ નમઃ । સ્થાનદાત્ર્યૈ । પદામ્બુજાયૈ ।
સ્થિતિરૂપાયૈ । સ્થિરાયૈ । શાન્તાયૈ । સ્થિતસંસારપાલિન્યૈ ।
દામોદરપ્રિયાયૈ । ધીરાયૈ । દુર્વાસોવરદાયિન્યૈ । દયામય્યૈ ।
દયાધ્યક્ષાયૈ । દિવ્યયોગપ્રદર્શિન્યૈ । દિવ્યાનુલેપનારાગાયૈ ।
દિવ્યાલઙ્કારભૂષણાયૈ । દુર્ગતિનાશિન્યૈ રાધાયૈ । દુર્ગાયૈ ।
દુઃખવિનાશિન્યૈ । દેવદેવ્યૈ । મહાદેવ્યૈ નમઃ । ૩૮૦

ૐ દયાશીલાયૈ નમઃ । દયાવત્યૈ । દયાર્દ્રસાગરાયૈ રાધાયૈ ।
મહાદારિદ્ર્યનાશિન્યૈ । દેવતાનાં દુરારાધ્યાયૈ । મહાપાપવિનાશિન્યૈ ।
દ્વારકાવાસિન્યૈ દેવ્યૈ । દુઃખશોકવિનાશિન્યૈ । દયાવત્યૈ ।
દ્વારકેશાયૈ । દોલોત્સવવિહારિણ્યૈ । દાન્તાયૈ । શાન્તાયૈ ।
કૃપાધ્યક્ષાયૈ । દક્ષિણાયજ્ઞકારિણ્યૈ । દીનબન્ધુપ્રિયાયૈ
દેવ્યૈ । શુભાયૈ । દુર્ઘટનાશિન્યૈ । ધ્વજવજ્રાબ્જપાશાઙ્ગ્યૈ ।
ધીમહીચરણામ્બુજાયૈ નમઃ । ૪૦૦

ૐ ધર્માતીતાયૈ નમઃ । ધરાધ્યક્ષાયૈ । ધનધાન્યપ્રદાયિન્યૈ ।
ધર્માધ્યક્ષાયૈ । ધ્યાનગમ્યાયૈ । ધરણીભારનાશિન્યૈ । ધર્મદાયૈ ।
ધૈર્યદાયૈ । ધાત્ર્યૈ । ધન્યધન્યધુરન્ધર્યૈ । ધરણીધારિણ્યૈ ।
ધન્યાયૈ । ધર્મસઙ્કટરક્ષિણ્યૈ । ધર્માધિકારિણ્યૈ
દેવ્યૈ । ધર્મશાસ્ત્રવિશારદાયૈ । ધર્મસંસ્થાપનાગ્રગાયૈ ।
ધ્રુવાનન્દપ્રદાયિન્યૈ । નવગોરોચનાયૈ । ગૌર્યૈ ।
નીલવસ્ત્રવિધારિણ્યૈ નમઃ । ૪૨૦

ॐ નવયૌવનસમ્પન્નાયૈ નમઃ । નન્દનન્દનકારિણ્યૈ । નિત્યાનન્દમય્યૈ ।
નિત્યાયૈ । નીલકાન્તમણિપ્રિયાયૈ । નાનારત્નવિચિત્રાઙ્ગ્યૈ ।
નાનાસુખમય્યૈ । સુધાયૈ । નિગૂઢરસરાસજ્ઞાયૈ ।
નિત્યાનન્દપ્રદાયિન્યૈ । નવીનપ્રવણાયૈ । ધન્યાયૈ ।
નીલપદ્મવિધારિણ્યૈ । નન્દાયૈ । આનન્દાયૈ । સદાઽઽનન્દાયૈ ।
નિર્મલાયૈ । મુક્તિદાયિન્યૈ । નિર્વિકારાયૈ । નિત્યરૂપાયૈ નમઃ । ૪૪૦

ॐ નિષ્કલઙ્કાયૈ નમઃ । નિરામયાયૈ । નલિન્યૈ । નલિનાક્ષ્યૈ ।
નાનાલઙ્કારભૂષિતાયૈ । નિતમ્બિન્યૈ । નિરાકાઙ્ક્ષાયૈ । નિત્યાયૈ ।
સત્યાયૈ । સનાતન્યૈ । નીલામ્બરપરીધાનાયૈ । નીલાયૈ । કમલલોચનાયૈ ।
નિરપેક્ષાયૈ । નિરુપમાયૈ । નારાયણ્યૈ । નરેશ્વર્યૈ । નિરાલમ્બાયૈ ।
રક્ષાકર્ત્ર્યૈ । નિગમાર્થપ્રદાયિન્યૈ નમઃ । ૪૬૦

ॐ નિકુઞ્જવાસિન્યૈ રાધાયૈ નમઃ । નિર્ગુણાયૈ । ગુણસાગરાયૈ ।
નીલાબ્જાયૈ । કૃષ્ણમહિષ્યૈ । નિરાશ્રયગતિપ્રદાયૈ ।
નિધૂવનવનાનન્દાયૈ । નિકુઞ્જેશ્યૈ । નાગર્યૈ । નિરઞ્જનાયૈ ।
નિત્યરક્તાયૈ । નાગર્યૈ । ચિત્તમોહિન્યૈ । પૂર્ણચન્દ્રમુખ્યૈ
દેવ્યૈ । પ્રધાનાયૈ । પ્રકૃતિપરાયૈ । પ્રેમરૂપાયૈ । પ્રેમમય્યૈ ।
પ્રફુલ્લજલજાનનાયૈ । પૂર્ણાનન્દમય્યૈ રાધાયૈ નમઃ । ૪૮૦

ॐ પૂર્ણબ્રહ્મસનાતન્યૈ નમઃ । પરમાર્થપ્રદાયૈ । પૂજ્યાયૈ ।
પરેશાયૈ । પદ્મલોચનાયૈ । પરાશક્ત્યૈ । પરાભક્ત્યૈ ।
પરમાનન્દદાયિન્યૈ । પતિતોદ્ધારિણ્યૈ । પુણ્યાયૈ । પ્રવીણાયૈ ।
ધર્મપાવન્યૈ । પઙ્કજાક્ષ્યૈ । મહાલક્ષ્મ્યૈ । પીનોન્નતપયોધરાયૈ ।
પ્રેમાશ્રુપરિપૂર્ણાઙ્ગ્યૈ । પદ્મેલસદૃશાનનાયૈ । પદ્મરાગધરાયૈ
દેવ્યૈ । પૌર્ણમાસીસુખાસ્વાદાયૈ । પૂર્ણોત્તમાયૈ નમઃ । ૫૦૦

ॐ પરઞ્જ્યોતિષે નમઃ । પ્રિયઙ્કુર્યૈ । પ્રિયંવદાયૈ ।
પ્રેમભક્તિપ્રદાયૈ રાધાયૈ । પ્રેમાનન્દપ્રદાયિન્યૈ ।
પદ્મગન્ધાયૈ । પદ્મહસ્તાયૈ । પદ્માઙ્ઘ્ર્યૈ । પદ્મમાલિન્યૈ ।
પદ્માસનાયૈ । મહાપદ્માયૈ । પદ્મમાલા-વિધારિણ્યૈ । પ્રબોધિન્યૈ ।
પૂર્ણલક્ષ્મ્યૈ । પૂર્ણેન્દુસદૃશાનનાયૈ । પુણ્ડરીકાક્ષપ્રેમાઙ્ગ્યૈ ।
પુણ્ડરીકાક્ષગેહિન્યૈ । પરમાર્થપ્રદાયૈ । પદ્માયૈ । પ્રણવરૂપિણ્યૈ નમઃ । ૫૨૦

ॐ ફલપ્રિયાયૈ નમઃ । સ્ફૂર્તિદાત્ર્યૈ । મહોત્સવવિહારિણ્યૈ ।

ફુલ્લાબ્જદિવ્યનયનાયૈ । ફણિવેણીસુશોભિતાયૈ । વૃન્દાવનેશ્વર્યૈ
રાધાયૈ । વૃન્દાવનવિલાસિન્યૈ । વૃષભાનુસુતાયૈ દેવ્યૈ ।
વ્રજવાસીગણપ્રિયાયૈ । વૃન્દાયૈ । વૃન્દાવનાનન્દાયૈ । વ્રજેન્દ્રાયૈ ।
વરપ્રદાયૈ । વિદ્યુદ્ગૌર્યૈ । સુવર્ણાઙ્ગ્યૈ । વંશીનાદવિનોદિન્યૈ ।
વૃષભાનુરાધેકન્યાયૈ । વ્રજરાજસુતપ્રિયાયૈ । વિચિત્રપટ્ટચમર્યૈ ।
વિચિત્રામ્બરધારિણ્યૈ નમઃ । ૫૪૦

ૐ વેણુવાદ્યપ્રિયાયૈ રાધાયૈ નમઃ । વેણુવાદ્યપરાયણાયૈ ।
વિશ્વમ્ભર્યૈ । વિચિત્રાઙ્ગ્યૈ । બ્રહ્માણ્ડોદરિકાયૈ । સત્યૈ ।
વિશ્વોદર્યૈ । વિશાલાક્ષ્યૈ । વ્રજલક્ષ્મ્યૈ । વરપ્રદાયૈ ।
બ્રહ્મમય્યૈ । બ્રહ્મરૂપાયૈ । વેદાઙ્ગ્યૈ । વાર્ષભાનવ્યૈ ।
વરાઙ્ગનાયૈ । કરામ્ભોજાયૈ । વલ્લવ્યૈ । વ્રજમોહિન્યૈ । વિષ્ણુપ્રિયાયૈ ।
વિશ્વમાત્રે નમઃ । ૫૬૦

ૐ બ્રહ્માણ્ડપ્રતિપાલિન્યૈ નમઃ । વિશ્વેશ્વર્યૈ । વિશ્વકર્ત્ર્યૈ ।
વેદમન્ત્રસ્વરૂપિણ્યૈ । વિશ્વમાયાયૈ । વિષ્ણુકાન્તાયૈ । વિશ્વાઙ્ગ્યૈ ।
વિશ્વપાવન્યૈ । વ્રજેશ્વર્યૈ । વિશ્વરૂપાયૈ । વૈષ્ણવ્યૈ ।
વિઘ્નનાશિન્યૈ । બ્રહ્માણ્ડજનન્યૈ રાધાયૈ । વત્સલાયૈ ।
વ્રજવત્સલાયૈ । વરદાયૈ । વાક્યસિદ્ધાયૈ । બુદ્ધિદાયૈ ।
વાક્પ્રદાયિન્યૈ । વિશાખાપ્રાણસર્વસ્વાયૈ નમઃ । ૫૮૦

ૐ વૃષભાનુકુમારિકાયૈ નમઃ । વિશાખાસખ્યવિજિતાયૈ ।
વંશીવટવિહારિણ્યૈ । વેદમાત્રે । વેદગમ્યાયૈ । વેદ્યવર્ણાયૈ ।
શુભઙ્કર્યૈ । વેદાતીતાયૈ । ગુણાતીતાયૈ । વિદગ્ધાયૈ ।
વિજનપ્રિયાયૈ । ભક્તભક્તિપ્રિયાયૈ રાધાયૈ । ભક્તમઙ્ગલદાયિન્યૈ ।
ભગવન્મોહિન્યૈ દેવ્યૈ । ભવક્લેશવિનાશિન્યૈ । ભાવિન્યૈ । ભવત્યૈ ।
ભાવ્યાયૈ । ભારત્યૈ । ભક્તિદાયિન્યૈ નમઃ । ૬૦૦

ૐ ભાગીરથ્યૈ નમઃ । ભાગ્યવત્યૈ । ભૂતેશ્યૈ । ભવકારિણ્યૈ ।
ભવાર્ણવત્રાણકર્ત્ર્યૈ । ભદ્રદાયૈ । ભુવનેશ્વર્યૈ । ભક્તાત્મને ।
ભુવનાનન્દાયૈ । ભાવિકાયૈ । ભક્તવત્સલાયૈ । ભુક્તિમુક્તિપ્રદાયૈ
રાધાયૈ । ભુજમૃણાલિકાયૈ શુભાયૈ । ભાનુશક્તિચ્છલાયૈ । ધીરાયૈ ।
ભક્તાનુગ્રહકારિણ્યૈ । માધવ્યૈ । માધવાયુક્તાયૈ । મુકુન્દાદ્યાયૈ ।
સનાતન્યૈ નમઃ । ૬૨૦

ૐ મહાલક્ષ્મ્યૈ નમઃ । મહામાન્યાયૈ । માધવસ્વાન્તમોહિન્યૈ ।
મહાધન્યાયૈ । મહાપુણ્યાયૈ । મહામોહવિનાશિન્યૈ । મોક્ષદાયૈ ।
માનદાયૈ । ભદ્રાયૈ । મઙ્ગલાયૈ । અમઙ્ગલાત્પદાયૈ? ।
મનોઽભીષ્ટપ્રદાયૈ દેવ્યૈ । મહાવિષ્ણુસ્વરૂપિણ્યૈ । માધવ્યાઙ્ગ્યૈ ।
મનોરામાયૈ । રમ્યાયૈ । મુકુરરઞ્જન્યૈ । મનીષાયૈ । વનદાધારાયૈ ? ।
મુરલીવાદનપ્રિયાયૈ નમઃ । ૬૪૦

ૐ મુકુન્દાઙ્ગકૃતાપાઙ્ગ્યૈ નમઃ । માલિન્યૈ । હરિમોહિન્યૈ । માનગ્રાહ્યૈ ।
મધુવત્યૈ । મઞ્જર્યૈ । મૃગલોચનાયૈ । નિત્યવૃન્દાયૈ ।
મહાદેવ્યૈ । મહેન્દ્રકૃતશેખર્યૈ । મુકુન્દપ્રાણદાયૈ । હન્ત્ર્યૈ ।
મનોહરમનોહરાયૈ । માધવમુખપદ્માસ્યાયૈ । મધુપાનમધુવ્રતાયૈ ।
મુકુન્દમધુમાધુર્યાયૈ । મુખ્યાયૈ । વૃન્દાવનેશ્વર્યૈ ।
મન્ત્રસિદ્ધિકૃતાયૈ રાધાયૈ । મૂલમન્ત્રસ્વરૂપિણ્યૈ નમઃ । ૬૬૦

ૐ મન્મથાયૈ નમઃ । સુમત્યૈ । ધાત્ર્યૈ । મનોજ્ઞમતિમાનિતાયૈ ।
મદનામોહિન્યૈ । માન્યાયૈ । મઞ્જીરચરણોત્પલાયૈ । યશોદાસુતપત્ન્યૈ ।
યશોદાનન્દદાયિન્યૈ । યૌવનાપૂર્ણસૌન્દર્યાયૈ । યમુનાતટવાસિન્યૈ ।
યશસ્વિન્યૈ । યોગમાયાયૈ । યુવરાજવિલાસિન્યૈ । યુગ્મશ્રીફલસુવત્સાયૈ ।
યુગ્માઙ્ગદવિધારિણ્યૈ । યન્ત્રાતિગાનનિરતાયૈ । યુવતીનાં શિરોમણ્યૈ ।
શ્રીરાધાયૈ । પરમારાધ્યાયૈ નમઃ । ૬૮૦

ૐ રાધિકાયૈ નમઃ । કૃષ્ણમોહિન્યૈ । રૂપયૌવનસમ્પન્નાયૈ ।
રાસમણ્ડલકારિણ્યૈ । રાધાદેવ્યૈ । પરાપ્રાપ્તાયૈ ।
શ્રીરાધાપરમેશ્વર્યૈ । રાધાવાગ્મ્યૈ । રસોન્માદ્યૈ । રસિકાયૈ ।
રસશેખર્યૈ । રાસમયીપૂર્ણાયૈ રાધાયૈ । રસજ્ઞાયૈ । રસમઞ્જર્યૈ ।
રાધિકાયૈ । રસદાત્ર્યૈ । રાસવિલાસિન્યૈ રાધાયૈ । રઞ્જન્યૈ ।
રસવૃન્દાયૈ । રત્નાલઙ્કારધારિણ્યૈ નમઃ । ૭૦૦

ૐ રામાયૈ નમઃ । રત્નાયૈ । રત્નમય્યૈ । રત્નમાલાવિધારિણ્યૈ ।
રમણ્યૈ । રામણ્યૈ । રમ્યાયૈ । રાધિકારમણ્યૈ પરાયૈ ।
રાસમણ્ડલમધ્યસ્થાયૈ । રાજરાજેશ્વર્યૈ । શુભાયૈ ।
રાકેન્દુકોટિસૌન્દર્યાયૈ । રત્નાઙ્ગદવિધારિણ્યૈ । રાસપ્રિયાયૈ ।
રાસગમ્યાયૈ । રાસોત્સવવિહારિણ્યૈ । લક્ષ્મીરૂપાયૈ । લલનાયૈ ।
લલિતાદિસખિપ્રિયાયૈ । લોકમાત્રે નમઃ । ૭૨૦

ૐ લોકધાત્ર્યૈ નમઃ । લોકાનુગ્રહકારિણ્યૈ । લોલાક્ષ્યૈ । લલિતાઙ્ગ્યૈ ।
લલિતાજીવતારકાયૈ । લોકાલયાયૈ । લજ્જારૂપાયૈ । લાસ્યવિદ્યાલતાશુભાયૈ ।
લલિતાપ્રેમલલિતામુગ્ધપ્રેમલીલાવત્યૈ । લીલાલાવણ્યસમ્પન્નાયૈ ।
નાગર્યૈ । ચિત્તમોહિન્યૈ । લીલારઙ્ગ્યૈ । રત્યૈ । રમ્યાયૈ ।
લીલાગાનપરાયણાયૈ । લીલાવત્યૈ । રતિપ્રીતાયૈ । લલિતાકુલપદ્મિન્યૈ ।
શુદ્ધકાઞ્ચનગૌરાઙ્ગ્યૈ નમઃ । ૭૪૦

ૐ શઙ્ખકઙ્કણધારિણ્યૈ નમઃ । શક્તિસઞ્ચારિણ્યૈ દેવ્યૈ ।
શક્તીનાં શક્તિદાયિન્યૈ । સુચારુકબરીયુક્તાયૈ । શશિરેખાયૈ ।
શુભઙ્કર્યૈ । સુમત્યૈ । સુગત્યૈ । ધાત્ર્યૈ । શ્રીમત્યૈ ।
શ્રીહરિપ્રિયાયૈ । સુન્દરાઙ્ગ્યૈ । સુવર્ણાઙ્ગ્યૈ । સુશીલાયૈ ।
શુભદાયિન્યૈ । શુભદાયૈ । સુખદાયૈ । સાધ્વ્યૈ । સુકેશ્યૈ ।
સુમનોરમાયૈ નમઃ । ૭૬૦

ૐ સુરેશ્વર્યૈ નમઃ । સુકુમાર્યૈ । શુભાઙ્ગ્યૈ । સુમશેખરાયૈ ।
શાકમ્ભર્યૈ । સત્યરૂપાયૈ । શસ્તાયૈ । શાન્તાયૈ । મનોરમાયૈ ।
સિદ્ધિધાત્ર્યૈ । મહાશાન્ત્યૈ । સુન્દર્યૈ । શુભદાયિન્યૈ । શબ્દાતીતાયૈ ।
સિન્ધુકન્યાયૈ । શરણાગતપાલિન્યૈ । શાલગ્રામપ્રિયાયૈ રાધાયૈ ।
સર્વદા નવયૌવનાયૈ । સુબલાયૈ । નન્દિન્યૈ દેવ્યૈ નમઃ । ૭૮૦

ૐ સર્વશાસ્ત્રવિશારદાયૈ નમઃ । સર્વાઙ્ગસુન્દર્યૈ રાધાયૈ ।
સર્વસલ્લક્ષણાન્વિતાયૈ । સર્વગોપીપ્રધાનાયૈ । સર્વકામફલપ્રદાયૈ ।
સદાનન્દમય્યૈ દેવ્યૈ । સર્વમઙ્ગલદાયિન્યૈ । સર્વમણ્ડલજીવાતવે ।
સર્વસમ્પત્પ્રદાયિન્યૈ । સંસારપારકરણ્યૈ । સદા કૃષ્ણકુતૂહલાયૈ ।
સર્વગુણમય્યૈ રાધાયૈ । સાધ્યાયૈ । સર્વગુણાન્વિતાયૈ । સત્યસ્વરૂપાયૈ ।
સત્યાયૈ । સત્યનિત્યાયૈ । સનાતન્યૈ । સર્વમાધવ્યલહર્યૈ ।
સુધામુખશુભઙ્કર્યૈ નમઃ । ૮૦૦

ૐ સદાકિશોરિકાગોષ્ઠ્યૈ નમઃ । સુબલાવેશધારિણ્યૈ । સુવર્ણમાલિન્યૈ
રાધાયૈ । શ્યામસુન્દરમોહિન્યૈ । શ્યામામૃતરસે મગ્નાયૈ । સદા
સીમન્તિનીસખ્યૈ । ષોડશીવયસા નિત્યાયૈ । ષડ્રાગવિહારિણ્યૈ ।
હેમાઙ્ગ્યૈ । વરદાયૈ । હન્ત્ર્યૈ । ભૂમાત્રે । હંસગામિન્યૈ ।
હાસમુખ્યૈ । વ્રજાધ્યક્ષાયૈ । હેમાબ્જાયૈ । કૃષ્ણમોહિન્યૈ ।
હરિવિનોદિન્યૈ રાધાયૈ । હરિસેવાપરાયણાયૈ । હેમારમ્ભાયૈ નમઃ । ૮૨૦

ૐ મદારમ્ભાયૈ નમઃ । હરિહારવિલોચનાયૈ । હેમાઙ્ગવર્ણાયૈ ।
રમ્યાયૈ । શેષહૃત્પદ્મવાસિન્યૈ । હરિપાદાબ્જમધુપાયૈ ।
મધુપાનમધુવ્રતાયૈ । ક્ષેમઙ્કર્યૈ । ક્ષીણમધ્યાયૈ ।
ક્ષમારૂપાયૈ । ક્ષમાવત્યૈ । ક્ષેત્રાઙ્ગ્યૈ । શ્રીક્ષમાદાત્ર્યૈ ।
ક્ષિતિવૃન્દાવનેશ્વર્યૈ । ક્ષમાશીલાયૈ । ક્ષમાદાત્ર્યૈ ।
ક્ષૌમવાસોવિધારિણ્યૈ । ક્ષાન્તિનામાદ્વયવત્યૈ । ક્ષીરોદાર્ણવશાયિન્યૈ નમઃ । ૮૩૯

રાધાનામસહસ્રાણિ પઠેદ્વા શ્રુણુયાદપિ ।
ઇષ્ટસિદ્ધિર્ભવેત્તસ્યા મન્ત્રસિદ્ધિર્ભવેત્ ધ્રુવમ્ ॥

ધર્માર્થકામમોક્ષાંશ્ચ લભતે નાત્ર સંશયઃ ।
વાઞ્છાસિદ્ધિર્ભવેત્તસ્ય ભક્તિસ્યાત્ પ્રેમલક્ષણ ॥

લક્ષ્મીસ્તસ્યવસેત્ગેહે મુખેભાતિસરસ્વતી ।
અન્તકાલેભવેત્તસ્ય રાધાકૃષ્ણેચસંસ્થિતિઃ ॥

ઇતિ શ્રીરાધામાનસતન્ત્રે શ્રીરાધાસહસ્રનામસ્તોત્રાન્તર્ગતા
નામાવલિઃ સમ્પૂર્ણા ॥

We have found 839 names corresponding to the rAdhAsahasranAmastotraM.

Proofread by PSA Easwaran

---

*Radha Sahasranama Namavali 1 a to kSha 1000 Names*
pdf was typeset on August 1, 2020

Please send corrections to *sanskrit@cheerful.com*